संस्कृत-श्लोक-गायन-स्पर्धा

## १. इन्द्रवज्रा

**लक्षणम्**— स्यादिन्द्रवज्रा यदि तौ जगौ गः।

**उदाहरणम्**—

अस्त्युत्तरस्यां दिशि देवतात्मा,
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य,
स्थितः पृथिव्या इव मानदण्डः॥

## २. वंशस्थ

**लक्षणम्**— जतौ तु वंशस्थमुदीरितं जरौ।

**उदाहरणम्**—

निपीय यस्य क्षितिरक्षिणः कथा-
स्तथाद्रियन्ते न बुधाः सुधामपि।
नलः सितच्छत्त्रितकीर्तिमण्डलः
स राशिरासीन्महसां महोज्ज्वलः॥

## 3.द्रुतविलम्बितः

**लक्षणम्** - द्रुतविलम्बितमाह नभौ भरौ।

**उदाहरणम्-**

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम्।

## ४. स्रग्विणी

**लक्षणम्**— रैश्चतुर्भिर्युता स्रग्विणी सम्मता।

**उदाहरणम्**—

वेदभाभासितं सत्कलालासितं
रम्यसङ्गीतसाहित्यसौहित्यभूः।
भारतीवल्लकीझङ्कृतैर्झङ्कृतं
भूतले भाति मेऽनारतं भारतम्।। १।।

## ५. पञ्चचामरम्

**लक्षणम्—** जरौ जरौ जगाविदं वदन्ति पञ्चचामरम्।

**उदाहरणम्—**

जटाटवीगलज्जलप्रवाहपावितस्थले।
गलेऽवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम्।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं।
चकार चण्डताण्डवं तनोतु नः शिवः शिवम्॥

## 6.वसन्ततिलका

**लक्षणम्-** उक्ता वसन्ततिलका तभजाजगौ गः।

**उदाहरणम् -**

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार॥

स्रोतम्- शिवराजविजयः

## 7.मालिनी- छन्दः

**लक्षणम्-** ननमयययुतेयं मालिनी भोगिलोकैः ।

**उदाहरणम्-**

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥

स्रोतम् - कालिदासविरचितं अभिज्ञानशाकुन्तलनाटकम्।

## 8. शिखरिणी-छन्दः

**लक्षणम् -** रसैः रूद्रैश्छिन्ना यमनसभलागः शिखरिणी।

**उदाहरणम्-**

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो,
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः।
न जाने मुद्रास्ते तदपि च न जाने विलपनं,
परं जाने मातस्त्वदनुसरणं क्लेशहरणम्॥1॥

स्रोतम्- देव्यपराधक्षमापनस्तोत्रम्

## 9.**मन्दाक्रान्ता**

**लक्षणम्-** मन्दाक्रान्ता जलधिषडगैम्भौं नतौ ताद् गुरू चेत्॥

**उदाहरणम्-**

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः।
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः॥
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु।
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥

## 10.**शार्दूलविक्रीडितम्**

**लक्षणम्-** सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्॥

**उदाहरणम्-**

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया।
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः।
पीड्यन्ते गृहिणः कथन्नु तनयाविश्लेषदुःखैर्नवैः॥

(स्रोतम्-अभिज्ञानशाकुन्तलम्)